कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M-2610 विषय

नाव गंगालहरी

लेखक / लिपीकार

पृठ 30 काळ पूर्ण / अपूर्ण

M-2610

॥श्री॥गंगा॥ल॥हरी॥आरं॥भ॥

श्रीगणेशायनमः॥श्रीविश्वेश्वरायनमः॥भागीरथीत्रिदशसेवितपादपद्मा अस्माभयामृतक
रारेवगळ्यत्लसा॥ मुक्ताविभूषणविराजितचारुदेहापापंविनाशयतुमेसुचूतप्रबाहा॥१॥दुर्गाराम
मल्हंप्रणम्यपितरंगोविंदरा॥ मात्मजंसाहित्यालयरंगनाथतनयंश्रीकृष्णभट्टंगुरुं॥ टीकांबालमु
देकरोमिविशदांगंगालहर्याःपरांतुष्यंतुप्रतिभाजुषश्चपलतांवीक्ष्यार्भकस्यस्फुटां॥२॥ अथचि
५ ल कीर्षितस्यपीयूषलहर्याख्यस्तवराजस्यनिर्विघ्नसमाप्तिकामनया॥ जगन्नाथाभिधेयःपंडितवर्यः
ते स्तवाधिष्ठात्रींदेवतांस्तौति॥ समृद्धेति॥ हेगंगेत्सलिलंजलंनोऽस्माकंअशिवंअकल्याणंशमय
तुशांतिंप्रापयतु॥ किंलक्षणंतत्॥ सकलवसुधायाः समृद्धंसौभाग्यंसकलासमस्तायावसुमती वसुधा
तस्याः॥ भूर्भूमिर्वसुधावनिर्वसुमतीतिहलायुधः॥ यद्वाकलाभिःकलाभिःसहवर्ततेसा
सकलासाचासौवसुधेतिविग्रहः कलनाकालयोःकलेतिविश्वः॥ समृद्धंसम्यक्ऋद्धं॥ वृध्यर्थे
न कादघ्नोतेःकर्मणिक्तः॥ समृद्धंवृद्धिमत्॥ एतादृशंसौभाग्यंसुभगस्यषडैश्वर्यस्यभावःसौभाग्यं

ष्यजंतमेलत् । जनुशान्तिकादित्वादुभयपदवृद्धिः । पुनः किं॰ लीलोर्जितं लीलयाऽनायासेन जनितं

उत्पादितं जगत्त्रयेन । लीलाविलासक्रियायोरित्यमरः । खंडपरशोः शंकरस्य । परशुः परशुरामेऽस्त्र

केरव्वूर्छले पिनाकीति मेदिनी । किमपि वचनानिर्देश्यं । महैश्वर्यं मह अनंतैश्वर्यं चेति विग्रहः । महच्छ

ब्दस्य परिणामार्थकतया अपरिमितैश्वर्यं । यद्वा । पूज्यं ऐश्वर्यं । मह पूजायां यद्वा महेन उत्सवेन

युक्तं ऐश्वर्यं । मह उद्धव उत्सवः । यद्वा मह आत्मानंदः । आनंदो ब्रह्मेति व्यजानादिति श्रुतेः । चिद्रूपाक

लयाव्याप्तमित्यर्थः । एतेन शंकरस्य सृष्टिस्थितिलयकार्यत्वे कारणीभूतत्वमेवेति ध्वनितं । पुनः किं॰

श्रुतीनां वेदानां सर्वं च तत् स्वं चेति विग्रहात् सकलं धनमिमिति भावः । इरावती धेनुमतीत्यादिरूपं । यद्वा

॥ श्री ॥ समृद्धं सौभाग्यं सकलवसुधायाः किमपि तन्महैश्वर्यं लीलाजनितजगतः खंडपरशोः ॥

श्रुतीनां कर्णानां सर्वस्वं समस्तात्मकं कर्णस्य शब्दविषयत्वाच्छब्दाश्रयत्वाच्च श्रुतिः श्रोत्रे च तत्कर्म

ण्याम्नायेऽद्वयोः स्त्रियामिति मेदिनी । गंगेति कर्णविवरपतितं कदाचित्स्यात्तत्सं परखिला तृणत्

॥२॥ य रत्ना

धाः सकाशा

लयरूपेत्याचार्यः ॥ अथानंतरं सुमनसां देवानां मूर्तं मूर्तिमत् सकलं पुण्यं द्रवरूपेण भूतलत्वमापत्ति
तं सन्मर्त्यानां चक्षुर्विषयकमासीदित्यर्थः ॥ अथवा सुमनोयेषां तेषां सज्जनानामित्यर्थः ॥ ज्ञेयाः
सुमनसो देवाः कुसुमानि च सज्जनाइत्यनेकार्थकोशः ॥ अत एवोक्तं त्रिपुरोपनिषत्यां ॥ मनो हि द्विविधं प्रो
क्तं शुद्धं चाशुद्धमेव च ॥ अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितं ॥ कामरहितसुमनसां सज्जनानां मू
र्तिधारि सुकृतं गंगारूपं ॥ पुनः किं० सुधासौंदर्यस्फिधान् ः सौंदर्यमाधुर्यं यस्य तत् ॥ ननु न सुधास
दृशं किंचिदस्ति ॥ यां पीत्वामरतां व्रजेदिति कथमेतस्याः सलिलस्य सुधातोपि सुंदरत्वमिति
॥ श्रुतीनां सर्वस्वं सुकृतमथ मूर्तं सुमनसां सुधासौंदर्यं ते सलिलमशिवं नः शमयतु ॥१॥
चेदुच्यते ॥ न हि सुधापानेन सायुज्याद्यवाप्तिः ॥ अत एवाचार्यचरणाः सुधामप्यास्वाद्य प्रतिभ
यजरामृत्युहरणीं ॥ प्रपद्यंते विश्वे विधिशतमखाद्यादिविबुधा इति ॥ एतेन सुधापानकर्तॄणामपि
मरणश्रवणादेतत्सलिलस्य सुधातः सौंदर्यं स्फुटमेव ॥ यदाह भगवान् कालिदासः ॥ कत्युक्ती

सुमनसः तेषां सुमन

णिकरोदय: कतिकतिद्वीपिद्विपानांत्वच: काकोला: कतिपन्नगा: कतिसुधाधाम्नश्चखंडा:
कति॥ किंचत्वंचकतित्रिलोकजननित्वद्वारिपूरोदरे मज्जज्जंतुकदंबकंसमुदयत्येकैकमादाय य
त्॥ जंतुकदंबकंग्रंथितामित्यंतं शिखरिणीवृतं॥ लक्षणंतु ग्रंथविस्तरभयान्नोक्तं॥१॥ ॥५॥ ॥५॥
॥ विलीनोवैवैस्वतनगरकोलाहलभरोगतादूतादूरं क्वचिदपिपरेतान्मृगयितुं॥ ॥५॥
विलीनश्इति हेमान: तेकल्याणीकल्याणकर्त्रीकिंध्यतेसाकथा गुणानुवर्णनमितियावत् यदवधिक्रियासा कथा
मान्येनपुंसकं यत्कालमालभ्यमहीमंडलंपृथ्वीचक्रवालं। चक्रवालंतुमंडलमित्यमर: अगात् आगता
तदवधि। यत्तदोर्नित्यसंबंध: तदवधितत्कालमारभ्यवैवस्वतनगरकोलाहलभर: विवस्वतोऽप
त्यंपुमान्वैवस्वत: यमस्तस्यनगरंसंयमिनीतस्यांकोलाहलभर: कलकलशब्दसमूह: पापिनामि
तिशेष: अथवादूतानां इमंपापिनंहन्यतां अमुंछिद्यतामित्यादिशब्दसमूह: विलीनोनष्ट: त्व
त्कथाया: भूतलप्राप्ते: पापिनोमुक्ताअभूवन् यमनगरंरिक्तमभूदित्यर्थ: तथाचोक्तं गंगागंगे

णिसमूह: एतेनयदीयस्सलिलपानकर्तॄ
णांनिर्वाणपदवीनदवीयसीतिभाव: समृ
द्धमित्यारभ्यशरर्थं

त्तियोब्रूयाद्योजनामितिसंगच्छतीत्ति। वै पादपूरणे निश्चयेवा। परे तान् मृतान् मृगयितुं (ग)वेषयितुं मृता
नां मार्गणायेत्यर्थः। दूताः यमभटाः क्वचिदपि दूरं गताः॥

॥ विमानानां व्राता विदलयति वीथीर्दिविषदां कथा ते कल्याणी यदवधि महीमंडलमगात् ॥
॥२॥

विमानानां व्योमयानानां। व्योमयानं विमानोस्त्रीत्यमरः। व्राताः समूहाः समाभेरे व्रातव्रजाः समूह
निचया वर्णिताः। वैजयंती। दिविषदां आदित्येयानां। आदितेया दिविषदो लेखा अदितिनंदनाः इत्यमरः।
पद्धतीः वीथीः वीथी पद्धतिर्मार्गेयनमध्वान्चवर्त्मनि तिकेशवः। विदलयति संकोचयति ॥२॥ त्वदीयां भसि
परेत्य ॥ निर्ग ॥ तानां ॥ मनुष्या ॥ णां विमा ॥ नैर्गगनमा ॥ गौरूढैरद्भि ॥ भावः ॥
आसीत्

दरिद्राणामिति तेनवबारां वारीणां प्रवाहः पूरः नो ३ स्मभ्यं अपारां न पारो अंतो यस्यास्तां अनंतामित्यर्थः

श्रियं त्रिवर्गसंपत्तिं दिशतुददातु श्रीर्वेषरचनाशोभाभारती सरलद्रुमे। लक्ष्म्यां त्रिवर्गसंपत्तावितिमेदिनी।

अथ नाम मंगलरूपः मंगलानंतरारंभप्रश्नकार्येष्वथोअथेत्यमरः दरिद्राणामकिंचनानां दैन्यं दीनतां

द्रुतं शीघ्रं दूरीकुर्वन्। लघुक्षिप्रमरंद्रुतं शीघ्रमित्यमरः पुनः किं। इहलोके दुर्वासनहृदां दुश्चवासना एषु

॥ दरिद्राणां दैन्यं दुरितमथदुर्वासनहृदां द्रुतं दूरीकुर्वन्सकृदपि गतो दृष्टिसरणिं ॥

धीने तानि दुर्वासनानि हृदये येषां ते तेषां दुश्चवासनाक्रांतमनसां पापिनामित्यर्थः स्वांतंहृन्मानसंमनइत्यमरः।

दुरितं दुष्कृतं दूरीकुर्वन्। पुनः किं। इहलोके दृष्टिसरणिं नेत्रपथं सकृत् एकवारं अपि यदि उपगतः प्राप्तः स्यात्

द्राक् सदिति अप्यर्थे यदि वार्थः स्यादितिकेशवः आविद्यः अविद्याया अयं आविद्यः अविद्याजनितइत्यर्थः

अज्ञानमूलकइति यावत् आविद्यश्चासौद्रुमश्चतं तस्यद्दलनमुन्मूलनं तस्यदीक्षागुरुः ब्रह्मज्ञानोपदेष्टे

आविद्यद्रुम:

९॥

तिभावः। दीक्षायाः फलं नरकव्यावृत्तिः। तदुक्तंईश्वरेण। समग्रवेदाध्ययनोपिविप्रोदीक्षाविहीनोन रकंप्रयातीति। साचगुरुमंतरान लभ्यते। एवंचाविद्यादुमदलनदीक्षागुरुत्वेन एतदीयप्रवाहस्याधिक्यंकथमितिचेदुच्यते। एतदीयवारांप्रवाहस्तुजन्ममरणरूपवृक्षोन्मूलनसमर्थोभवति॥

॥अपिप्रागाविद्यद्रुमदलनदीक्षागुरुरिहप्रवाहस्तेवारांश्रियंमिलमपारांदिशतुनः॥

॥२॥

यथाकश्चिद्गुरुः शरणागतंशिष्यंब्रह्मज्ञानोपदेशेनस्वस्वरूपतांनयति। प्रवाहस्तुदृष्टिसरणिं सकृदुपगतः सन्विलक्षणफलदानसमर्थस्तस्माद्दीक्षागुरोरपिअस्याधिक्यमितिरहस्यमिति भावः॥२॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥

मुग्

गांगाः

उदंचन्मात्सर्येतिअमी गंगायाः इमे गांगाः गंगासंबंधिनस्तरंगाः पुनर्भवं नीतिपुनर्भवं नैः स्तेषां पु
नः संसारेखुत्पद्यमानानामस्मदादीनामितिशेषः दुरितभरभंगायदुष्कृतसमूहनाशायभवंतुतादर्थ्ये
चतुर्थी किं लक्षणाः प्रोत्तुंगाः उन्नताः पुनः किं॰ उदंचतीति उदंचत्सर्वांगीयैन्मात्सर्यं मत्स
रस्यभावोमात्सर्यं परोत्कर्षाऽसहनंमत्सरः अत्रपरासपत्नीगंगारूपातस्याउत्कर्षोमहत्त्वपत्युःशिरोऽ
॥उदंचन्मात्सर्यस्फुटकपटहेरंबजननीकटाक्षव्याक्षेपक्षणजनितसंक्षोभनिवहाः भवंतुत्वय्येतेहर
शिरसिगांगाःपुनरमीतरंगाःप्रोत्तुंगादुरितभरभंगायभवतां ॥४॥ ॥धिरोहणरूपः तेनस्फुटं व्य
क्तं यत्कपटं तेनयुक्तायाहेरंबजननीपार्वतीतस्याःकटाक्षाःईर्ष्ययावलोकितानितेषांव्याक्षेपेण व्याप्ति
प्याजनितःजातःक्षणंक्षणमात्रंसंक्षोभनिवहोउद्वेलसमूहोयेषां अतएवहरस्यमहादेवस्यशिरसि
त्वय्येतेत्वय्यागच्छंतः एतावतायस्यपुरुषस्यगृहिणीद्वयंतिष्ठतितयोरनपत्यानेष्यरूरीतिलोके
हेरंबजननी प्रसिद्धिः महादेवस्यतुहेरंबस्यसकलविघ्नाटवीदवानलस्यजननीमाता एतादृशीं पार्वतींवामांगे
धारयति तांचपुनरुत्तमांगेधारयामास अततत्वदीयरूपशीलपरोपकारादिगुणसंपत्त्यामहादे

श्रीगंगा॥

॥५॥

मरुल्लीलेति। तेनवर्जं घालं वेगवत्तरं अथ जंघालं जंघापरिमितं अहंतेभ्यो रुजस्थ्यतरनिव
चनात्कचित्परीमाणेपि लघु संभवति उदाहरणंतुस्वधियोह्यं सुधीभिः जंघापरिमितजलस्या
बालादिस्नानादियोग्यत्वात् जलंमज्जननजालंजरयतु विशिथिलयतु जननानांजन्मनां जनुर्जन
मानायः नजन्मानीत्यमरः जालंकर्मरूपं अनायः पुंसिजालंस्यादित्यमरः उक्तंच स्वकर्मसूत्रग्रथितो

॥ मरुल्लीलालोलल्लहरिलुलितांभोजपटलीस्खलत्पांसुव्रातच्छुरणविलसत्कौंकुमरुचि॥
॥ सुरस्त्रीवक्षोजक्षरदगरुजंबालजटिलंजलंतेजंबालंममजननजालंजरयतु॥५॥

हिलोकइति अथवा जननानांजालंसमूहं चतुरशीतिलक्षयोनिरूपं जालंसमूहआनायइत्य
दिव्यांगनानां मरः किंलक्षणंजलं सुरस्त्रीणांस्तनयोः सकाशात्क्षरत्तुस्रवित्तः अगरुस्तस्यजंबालः पंकस्ते
वक्षोजाः नजटिलंमिश्रितं पुनः किं० मरुतांपवनानांलीलामंदमंदचलनंतेनलोलंत्यश्चपलायालहर्य
स्ताभिर्लुलितानिकंपितानिअंभोजपटलानिकमलसमूहास्तेभ्यस्खलन्त्यधःपतन्त्यःपांसु
व्रातःरजःसमूहःपांसुर्नातिद्वयोरजइत्यमरः तस्यच्छुरणंमेलनंतेनविलसत्विलसन्शीलं

कृष्णागरु

पाटे

लहरी॥

विसरदिति विसरणशीलंलेनकौंकुमरुचि कुंकु
मस्यकेसरस्यरयं कौंकुमीरुचिः केसरतुल्यकांति
एलेनकमलपरागसंपर्कितंजलं घ्राणेंद्रियाल्हा
दंस्त्रवतीतिसूचितं ॥५॥ ...कौंकुमीरुचिरिति

स्फुरत्कामेति। दिव्यसरितः दिविभवाः दिव्याः तेषां सरित् नदी दिव्यपदं सरितो विशेषणं वात
स्याः दिव्यसरितः स्वर्नद्याः मरुदुल्लासलहरीछटा चंचत्पाथः कणसरणयः मरुतामुल्लासः
उल्लसनं तेन लहरीछटाभिश्चंचत् चंचलं यत्पाथः उदकं। कबंधमुदकं पाथ इत्यमरः। तस्य कणाः
शीकराः शीकरोंबुकणाः स्मृत इत्यमरः तेषां सरणयः पंक्तयः प्रतिदिनं प्रत्यहं नो अस्माकं कम
॥ स्फुरत्काम क्रोधप्रबलरससंजाततज टिलज्वरज्वालाजालज्वलितवपुषां नः प्रतिदिनं ॥
पिबचनगोचरं संतापं संज्वरं। संतापः संज्वरः समावित्यमरः। आध्यात्मिकाधिदैविकाधिभौतिकरूपं
जातित्वादेकवचनं अत एवोक्तं। तापत्रयावरकमौषधमद्वितीयं गांगंपयोभवहरं भजेहमुमुक्षोर
तिहरतां दूरीकुर्वंतु किंलक्षणानां नः स्फुरन्ननुपायाय कामः अभिलाषः इदं मे भूयादिदं मया
लब्धं इदं प्राप्स्य इत्याकारः कामः स्मरेभिलाषे च कामं रेतो निवासयोः। अव्ययं त्वभ्यनुज्ञायामि
ति विश्वः। तस्मात् क्रोधः परकृतापमानादिजन्यः। अत्र पंचमीतत्पुरुषेण कामक्रोधयो

र्जन्यजनकत्वं संभवति। अतएवोक्तंगीतायां। संगात्संजायतेकामः कामात्क्रोधोभिजायत इति। तस्यप्र

॥ ६॥ द्रवः बलेयोरसौ ॥ रसस्यासारदेश्शृंगारादौवीर्येद्रवेजलेइति धरणिः एवंचसन्तप्तस्यापिद्रवीभूतेस्य द्रव्य

॥ हरंतांसंतापंकमपिमरुदुल्लासलहरीछटाचंचत्पाथः कणसरणयोदिव्यसरितः ॥

॥ ६ ॥

तयोसर्व्वेः

सर्वांगप्रसारित्वंअनुभवसिद्धं तेनसंजातः सम्यक्जातः सन्जटिलः जटायुक्तः जटिलापिप्पली

मांस्योर्जटायुक्तोतुवाच्यमितिमेदिनी। सचासौज्वरस्तापाग्निस्तस्यज्वालानांशिखानां वन्हेर्ह्वयोज्वलिकालावार्चिर्हेतिः

रुंकीलाविलयमरः जालंसमूहः तेनज्वलितंदग्धंवपुः शरीरंयेषांतेषामित्यर्थः ॥ ६॥ ॥ ५॥ ५ शिखाशिखायाइत्यमरः

॥ ५॥ ॥ ५॥ ॥ ५॥ ॥ ५॥ ॥ ५॥ ॥ ५॥ ॥ ५॥ ॥ ५॥ ॥ ६॥

जडानिति जडान् मूर्खान् जडो मूर्खे हिमग्रस्ते मूकशिव्यां जडा मते इति विश्वः विवेकरहितान् उक्तं च
आहारनिद्राभयमैथुनानि च बारिचिन्हानि वसंति देहे एको विवेकोप्यधिको मनुष्ये तेनैव हीनः पशुभिः स
मान इति मूर्खस्यापि शास्त्रप्रसिद्धं पशुत्वं यद्वा जडान् अचेतनान् वृक्षादीन् अंधान् नेत्रहीनान् यद्वा अंधयतीत्य
ंधं अज्ञानं तद् स्त्रियेषामिति मत्वर्थीयो अच् ज्ञानहीनान् पंगून् पादरहितान् प्रसृति बधिरान् प्रसूत्यास्य
जडानंधान्पंगून्प्रसूति बधिरानुक्तिविकलान् ग्रहग्रस्तानस्ताखिलदुरितनिस्तारसरणीन् निलिंपै
र्निर्मुक्तानपि च निरयांतर्निपतितो नरानंब त्रातुं त्वमिह परमं भेषजमसि ॥ १९ ॥ श्रोत्रेन बधिरान् उ
क्तिविकलान् उक्तौ व्यवहारे विकलाः तान् व्याहार उक्तिर्लपितमित्यमरः ग्रहैः रव्यादिभिर्ग्रस्तान् पीडितान् अ
स्ताखिलदुरितनिस्तारसरणीन् अखिलं समस्तं यद्दुरितं अखिलदुरितं तस्य निस्तारः निस्तरणं तस्य सर
णिः पंक्तिः अस्ता येषां तान् निलिंपैर्देवैः शोभा निलिंपा सुरः स्वर्गिनिष्प्रनभुः सदृश इति त्रिकांडशेषः निर्मुक्ता
न् त्यक्तान् अपि च परं निरयांतर्निपतितः निरयस्य नरकस्य अंतर्मध्ये निपतितः निमज्जनः अंतर्मध्ये
तथा प्रांते स्वीकारार्थेपि दृश्यते इति विश्वः एतद्विशिष्टान् नरान् त्रातुं पालयितुं इह संसारे परमं परमौ
अस्ताखिलदुरितस्य निस्तारसरणी २

श्रीगंगा ॥ ॥ ७ ॥

निधानमिति हे गंगे तव वपुः नोऽस्माकं तापं परिहरतु दूरीकरोतु किं लक्षणं धर्माणां निधानं वृ
षाणां शेवधिं निधीयते स्मिन्निति निधानं अधिकरणे ल्युट् धर्मालयमित्यर्थः पुनः किंभूतं नवसुधानां
अपूर्वा सुरस्त्रीणां अपूर्वहर्षाणां किमपि अनिर्वाच्यं विधानं कारणं तीर्थानां पुष्करादीनां प्रधा
नं अग्रगण्यं प्रधानमग्रगण्यं पुंस्यमात्ये प्रकृतौ स्त्रियामित्यमरः पुनः त्रिजगतः त्रैलोक्यस्य अमलं
परिधानं परिधीयते इति परिधानं वस्त्रं अमलं निर्दोषं निर्मलं सरिधानं नेत्रि समस्तजगद्विषयक पापतारक
॥ निधानं धर्माणां किमपि च विधानं नवमुदां प्रधानं तीर्थानां अमलपरिधानं त्रिजगतः समाधा
॥ नं बुद्धेरथ खलु तिरोधानमधियां श्रियामाधानं नः परिहरतु तापं तव वपुः ॥ १२ ॥ मित्यर्थः अत्रा
मलत्वं परिधीयमानं सत् परिधातुः सकलमंगलदायकं भूत्वा क्षीणे पुण्ये मर्त्यलोकं विशंतीत्यादिदोष
रहितत्वमपि परिधाने बोद्धव्यं अयमाशयः गमागमम् अवर्जितं लदीयजलरूपवस्त्रमवृतानां नभूयो
न्य परिधानं अवशिष्यत इति पुनः किं बुद्धेः लनस्य समाधानं समाधायकं य आप्य बुद्धेः समाधानं
जायते इत्यर्थः अथानंतरं खलु वाक्यभूषायां खलु स्याद्वाक्यभूषायां जिज्ञासायां च संलग्न इत्यमरः
तेषां अधियां न धीर्येषां प्रज्ञाहीनानां तिरोधानं दोषांतरधायकं पुनः किं श्रियां त्रिवर्गसंपत्तीनां आधानं आ

लहरी ॥ १२ ॥ धर्मकं श्रीयुक्तं गंगाशीलपारा ...

स्वभावेति हे मातः तव पांजलानां। किंलक्षणानां स्वभावस्वच्छानां निसर्गतो निर्मलानां। पुनः किं ल॰ सहजशिशिराणां स्वाभाविकशीतलानां। अयं सन्निकृष्टवर्ती कोपि अनिर्वचनीयः महिमा। जगत्यस्मिन्विश्वस्मिन् सर्वोत्कर्षेण वर्तते। किंलक्षणः अपारः न पारो अंतो यस्य स अपारः अनंत इत्यर्थः। अपारत्वे हेतुमाह। यं महिमानं आद्यापि रदानीमपि मुदा हर्षेण। मुत्प्रीतिः प्रमदो हर्ष इत्यमरः। द्युतलं स्वर्लोकं स्वरलोको द्यो दिवौ द्वे स्त्रियामित्यमरः। सगरजाः सगरान्नृपचिरात्संजाताः सगरजाः

॥स्वभावस्वच्छानां सहजशिशिराणामयमपां मपारस्ते मातर्जयति महिमा कोपि जगति॥

॥सदायं गायंति द्युतलमनवद्यद्युतिभृतः मुदा साद्याद्यापि स्फुटपुलकसांद्राः सगरजाः॥९॥ समा

सगरपुत्राः आसाद्य प्राप्य किंलक्षणः अनवद्यद्युतिभृतः निर्मलकांतिधारिणः। पुनः किं॰ स्फुटपुलकसांद्राः संतः सदा निरंतरं गायंति गानं कुर्वंति। स्फुटो बहिर्गतो यः पुलको रोमांचः पुलकः कृमिभेदः स्यादुत्त्वर्षे मणिभेदयोः गजपिंडे रोमांचे इति विश्वः तेन सांद्राः आपुताः प्रेमपरिपूर्णा इत्यर्थः त्वदीयजलसंपर्कसंक्षालितसकलाघौघाः षष्टिसहस्रं सगरनृपात्मजा दिव्यदेहधारिणः एतावत्कालपर्यंतमपि हृष्टाः संतः त्वदीयं स्वर्गे निर्वचनीयमहिमानं गायंतीति भावः॥९॥

जयति

कृतक्षुद्रेति। त्रिभुवनतले ब्रह्मांडोदरे तीर्थनिवहाः तीर्थसमूहाः कृतक्षुद्राघौघान् कृतः क्षुद्रः तिनिंद्योऽघ
यो घौघैः तान् अथ तत्कारणानंतरं झटिति द्राक्। द्राक् झटिति त्वंजसा ह्नायेत्यमरः संतप्तं मनो येषां तान् पश्चा
त्तापे भवेदर्धमितिवचनात्। पापं कृत्वा पश्चादनुतापं कुर्वाणानित्यर्थः। एतादृशान् जनान् समुद्धर्तुं पापादुद्धा
रं कर्तुं संति भवंति अपि निश्चयेन प्रायश्चित्तप्रसरणपथातीतचरितान् प्रायश्चित्तं कृच्छ्रादि तस्य प्रसरणं

॥कृतक्षुद्राघौघानथ झटिति संतप्तमनसः समुद्धर्तुं संति त्रिभुवनतले तीर्थनिवहाः॥

॥अपि प्रायश्चित्तप्रसरणपथातीतचरितान् नरानूरीकर्तुं जगति खलु जागर्ति भवती॥

॥१०॥

विधिः तस्य पंथा इति प्रायश्चित्तप्रसरणपथः तस्मादतीतमतिक्रांतं चरितमाचरणं येषां तान् प्रायश्चि
त्तविधानशून्यकृतकर्मण इत्यर्थः। नरान् मनुष्यान् ऊरीकर्तुं अंगीकर्तुं जगति विश्वस्मिन् खलु निश्चयेन भ
वती त्वमेव जागर्ति विगतनिद्रा असि क्वचित् उद्धारो न जायते [illegible] तेषामुद्धारस्त्वदधीन इति भावः॥१०॥

१ एषां २ दपि

निंद्यानि

विनिंद्यानीति। उन्मत्तैरपि उत्पथगामिभिरपि विनिंद्यानि विशेषेण गर्ह्याणि पितृहननादीनि। स्यादुन्मत्तस्तु धत्तूरेत
थाचोत्पथगामिनि रंभसः। चपुनः पतितैरपि परिहार्याणि परितः आसमंतात् हर्तुं त्यक्तुं योग्यानि ब्राह्मणहन
नादीनि। व्रात्यैश्चांडालविशेषैरपि अवाच्यानि। अगम्यागमनादीनी। सपुलकं सरोमांचं यथास्यात्तथा पिशुनैः अ कर्णेजपैः
पास्यानि अपास्तुं क्षिप्तुं योग्यानि स्वमातृजारसंकथनादीनि एतादृशानि। कियतां कतिपयानां लोकानां जनानां एनां
सि वृजिनानि। कलुषं वृजिनैनोऽघमंहोदुरितदुष्कृतमित्यमरः। अनवरतं अजस्रं नित्यानवरताजस्रमित्यमरः। हरं

॥ विनिंद्यान्युन्मत्तैरपि च परिहार्याणि पतितैरवाच्यानि व्रात्यैः सपुलकमपास्यानि पिशुनैः ॥
॥ हरंती लोकानामनवरतमेनांसि कियतां कदापि श्रांता न त्वमिव जननि त्वं विजयसे ॥ ७ ॥

ती नाशयंती त्वं कदापि कस्मिंश्चित्कालेपि। न श्रांता न खिन्ना। अतः कारणात् हे जननि त्वमिव त्वं विजयसे सर्वो
त्कर्षेण वर्तसे। अत्र यदि त्वत्तुल्यमुपमानं स्यात्तदा त्वमुपमेया स्यात्। अतस्त्वदुपमा त्वमेव। अत्रानन्वयालंका
रः। तदुक्तं चंद्रालोके। उपमानोपमेयत्वं यदेकस्यैव वस्तुन इति लक्षणात् ॥ ७ ॥ ॥ ॥ ॥ ॥

स्खलंतीति। अये इति कोमलानुमंत्रणे। अये जननि स्वर्लोकात् त्रिदिवात् स्खलंती पतंती निपतंती त्वं। किमर्थमित्यपे
क्षायामाह। अवनितलशोकापहृतये अवनेर्भूमेर्यत्तलं आधरः। तलश्चपेटे तालाद्रौ तलोव्याघात वारणे
त्सरौ स्वभावाधरयोस्त्वं श्रीघाले च सव्यतर इति मेदिनी। अत्रावनिशब्देन तन्निवासिनो मंचाः क्रोशंतीतिवल्लक्षणया अ
तल वनिस्था मनुष्या लक्ष्यंते। शोको मानसो धर्मः। शोकमोहौ तु मानसाविति वचनात्। तस्यापहृतये नाशाय
॥स्खलंती स्वर्लोकादवनितलशोकापहृतये जटाजूटग्रंथौ यदसि विनिबद्धा पुरभिदा॥
॥अये निर्लोभानामपि मनसि लोभं जनयतां गुणानामेवायं तव जननि दोषः परिणतः॥८॥
एतेन एतस्याः परोपकारित्वं सूचितं। यत् यस्मात् कारणात् त्रिपुरभिदा त्रिपुरारिणा जटाजूटग्रंथौ कपर्दे कपर्द ग्रंथौ
स्य जटाजूट इत्यमरः। निबद्धा असि गूहिता असि अतः कारणात्तव गुणानां किं लक्षणानां निर्लोभानां अ
लुब्धानां तेषामपि मनसि लोभं जनयतां उत्पादयतां अयमेव परिणतः परिपक्वो दोष इति व्याजनिंदा ॥८॥
॥ ॥ ॥ ॥ श्रीगंगाप्रसन्न॥ ॥ ॥ ॥ श्रीगंगाप्रसन्न॥ ॥ ॥ ॥ ॥ श्रीगंगाप्रसन्न॥ ॥ ॥

संघातः

इदमिति। हे जननि तव जलानां स एषः प्रवाहः नोऽस्माकं पापं दुःखं हरतु दूरीकरोतु। किंलक्षणः श्रीकंठस्य नीलकंठस्याप्रतिहतोऽपरिमितो जो जटाजूटः केशसमूहस्तेन जटिलो मिश्रितः। पुनः किं० यस्य संघातस्य तरंगैरूर्मिभिः हीति निश्चयेन सकलभुवनाभोगभवनं सकलानां समस्तानां भुवनानां लोकानां चतुर्दशानामिति यावत् आभोगः पूर्णता आभोगो वरुणछत्रे पूर्णतायत्नयोरपीति विश्वे। तस्य भवनं आवा

॥ इदं हि ब्रह्मांडं सकलभुवनाभोगभवनं तरंगैर्यस्यांतर्लुठति परितस्तिंदुकमिव ॥ ॥ ॥

॥ स एष श्रीकंठाप्रतिहतजटाजूटजटिलो जलानां संघातस्तव जननि तापं हरतु नः ॥ १३ ॥

सः। आवासो वसथं गृहं च भवनमिति हलायुधः। इदं ब्रह्मांडं परितः आसमंतात् अंतः मध्ये तिंदुकमिव तिंदुकफलमिव लुठति इतस्ततः प्रसरति। अयमभिप्रायः। कल्पांते विकीर्णमहादेवजटाजूटनिर्गतत्वदीयजलसंघातसंप्लावितमेतत् ब्रह्मांडं तिंदुकवत् अतिभाति। एतेन एतदीयप्रवाहस्य ब्रह्मांडविभववृत्तिरोभावस्यकारणत्वं सूचितं ॥ १३ ॥ ॥ ४ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ६ ॥

द्रुति

मध्यकतमया नद्या

नगेभ्य इति। हे जननि कविभिर्वाल्मीक्यादिभिः यस्यां नद्यां तव तुलालेशः तुलाछाया: सादृश्यस्य तुलापल
शतेरा शोभांउ सादृश्यमानयोरितिविश्वः। लेशो लवः एकदेश इति यावत्। दीयेत उपमीयेत। हे सुरधुनि स्वर्गं
गे। तां त्वं कथय वद। ननु नर्मदा दृषद्ः सर्वाः शंकरा स्नानसंशय इति रेवाखंडे। हरिहरक्षेत्र महात्म्ये च। गंडकी
प्रभवाः सर्वाः शिला नारायणात्मिका इति वचनात् कथं तुलालेशो रेवा प्रभृतिषु न संघटते इत्यत आह। नगेभ्यो
हिमाचलादिभ्यो यां तीनां निर्गच्छंतीनां पुराणां अथवा चतुर्दशलोकानां संहर्तुः संहारकर्तुर्महादेवस्य कपर्दज त्रिपुराणां ५

॥ नगेभ्यो यांतीनां कथयत टिनीनां कतमया पुराणां संहर्तुः सुरधुनि कपर्दे धिरूढे ॥

॥ कया वा श्रीभर्तुः पदकमलमक्षालि सलिलैस्तुलालेशो यस्यां तव जननि दीयेत कविभिः ॥

॥९४॥ अथवा

टाजूटः अधिरूढे अधिरूढः अपि तु का कान। कतमया वा श्रिया लक्ष्म्याः भर्तुः कांतस्य। कांतस्या
मितापतिवरयित्ताभर्त्ताच भोक्ता धव इति हलायुधः विष्णोः सलिलैः स्वकीयपाथोभिः पदकमलं च
रणारविंदं। पदं व्यवसित त्राणस्थान लक्ष्मंघ्रिवस्तुष्वित्यमरः अक्षालि क्षालितं धौतमित्यर्थः अपि तु
न कयापीति काकुः। यदि तुलालेशदानयोग्या न कापि कदाचिदपि तदा सा मध्येण तुलायोग्या कालभ्य

जागर्ति

समुत्पत्तिरितिहेजननिजगतित्वयोत्कर्षः आधिक्यंकस्मान्नेंजागरूको भवति। अपितुसर्वस्मादेवेतिभावः। प

द्मारमणपदपद्मामलनखात्पद्मायाः कमलाया लक्ष्मीः पद्मालयापद्मेत्यमरः। रमणःप्राणनाथः विष्णुरितिया | पद्मा कमला श्री

वत्। तस्यपदपद्मंचरणकमलं तस्यामलोयोनखस्तस्मात्तवसमुत्पत्तिः जनिः। जनिरुत्पत्तिरुद्भवइत्यमरः। एतेन | हरिप्रियेत्यम

यैति श्रैष्ठ्यमुक्तं स्थानतो पि श्रैष्ठ्यमाह। कंदर्पोनंगः। कंदर्पोदर्पकोनंगइत्यमरः। तस्यप्रतिभटः प्रतिद्वंद्वीमहा | रः ॥१२

॥समुत्पत्तिःपद्मारमणपदपद्मामलनखान्निवासःकंदर्पप्रतिभटजटाजूटभवने॥ ॥५॥

॥अथायंव्यासंगोनिखिलजननिस्तारणविधौस्ते कस्मादुत्कर्षस्तवजननिजागर्तिजगति॥१५॥

तत्र
देवस्तस्यजटाजूटएवभवनंगृहं निवासः वसतिस्थानमितिस्थानतः श्रैष्ठ्यमुक्तं व्यवसायादपि श्रैष्ठ्यमाह।

नंत रे सकाशात
अर्थं अयंसन्निकृष्टवर्तीनिखिलजननिस्तारणविधेः निखिलानांसमस्तानांजनानांनिस्तारणंपापादुद्धर | प्राणिनां

स
णंतस्यविधिर्विधानंकरणमितियावत्। विधिर्विधानेदैवेपीत्यमरः। तस्यव्यासंगउद्योगःयत्नइतियावत्।

एतेनसकलनदीनदशिरोमणित्वमितिभावः। ॥१५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥

३ रूच्याभीकवराभिकाश्चरमणःप्राणाधि
नाथोनुकइतिहलायुधः॥

हेमातः पुनश्च एवंविधान् मम गुणगणान् गुणसमूहान् श्रावंश्रावमपिपुनः पुनः श्रुत्वापि खलुखलः ऋतेविनाक्षणमपित्रिंशात् कलामात्रमपि मम वदनं मुखं कः ओनिर्यारित नाम प्रसिद्धोनिरीक्ष्येत पश्येत् नामप्रसिद्धो एवंविधान् कान् इत्याकांक्षायामेह श्ववृत्तो नीचसेवा

गो

॥ श्ववृत्तिर्व्यासोनियतमथमिथ्याप्रलपनंकुतर्केष्वभ्यासःसततपरपैशुन्यमननं ॥
॥ अपिश्रावंश्रावंममतुपुनरेवंगुणगणान्ऋतेत्वत्कोनामक्षणमपिनिरीक्षेततवदनं ॥ १९ ॥

यांनियतं नियमेनव्यासंगः परिशीलनं अथनियतं नियमेनमिथ्यामृषाप्रलपनंआलपनं अथचकुतर्केषु कुत्सितोहतेषुआभ्यासः ओभ्यासनंअथचपरेषांअन्येषांपैशून्यस्यदोषसूचकस्यमननंयुक्तयानुचिंतनं ॥ १९ ॥ ॥ ५ ॥ ॥ ६ ॥ ॥ ५ ॥

एकेजनाः। सततंसंततं। इहलोकोमर्त्यलोकस्तत्संबंधिनः। अर्थस्यकार्यस्यघटकाःसंपादकाः कियन्तः। अगणिताःसंतिचपुनःपरेअन्येपूतःशुद्धःआत्माअंतःकरणंयेषांतेतथापरलोकः स्वर्गादिलोकः। तंप्रणयंतिअनुसरंतितेतथाकतिसंति। अगणिताइत्यर्थः। हेमातः।

॥ कियंतःसंत्येकेसततमिहलोकार्थघटकाःपरेपूतात्मानःकतिचपरलोकप्रणयि
॥ नः। सुखंशेतेमातस्तवखलुकृपातःपुनरयंजगन्नाथःशश्वत्त्वयिनिहितलोकद्वयभरः॥

॥२०॥

जननिपुनश्च। अयंजगंन्नाथःशश्वत्। निरंतरंत्वयिजनन्यांनिहितःविश्वस्यस्थापितः लोकद्वयस्यइहामुष्मिकलोकयुगस्यभरोभारोयेनसतथाविधःसन्तवतेकृपातःदयातःसुखंनिश्चिंतंशेतेनिद्रातीत्यर्थः॥२०॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

रल अस्मिन्लोके ऽआभ्यां ऽअलिसन्निहिताभ्यां विशालाभ्यां नयनाभ्यां नेत्राभ्यां किंफलं। किंकार्यं न किंचित्फलमित्यर्थः। खलु निश्चितं काभ्यामित्याकांक्षायामाहयाभ्यां नयनाभ्यां परमरमणीया ऽअतिरुचिरा तव लतनुः विग्रहः। न आलीढा नाश्लिष्टा मनुजहतकस्य

॥विशालाभ्यामाभ्यां किमिह नयनाभ्यां खलु फलं नयाभ्यामालीढा परमरमणीया तव॥
॥तनुः॥ अयं हि न्यक्कारो मनुजहतकस्य श्रवणयोर्ययोर्नान्तर्यातस्तव लहरिलीला
॥कलकलः॥२१॥

ऽजीवन्मनुष्यशवस्य अयं हि श्रोत्रयोः श्रवणयोः। हिर्निर्धारणे नियत निष्फलत्वरूपः न्यक्कारः तिरस्कारः कयोरित्याकांक्षामाह तव ते लहरीणां क्रीडया। लीलया। कलकलः कोलाहलः। ययोः श्रवणयोः अंतः मध्ये न यातः न प्राप्तः॥२१॥ ॥५॥ ॥५॥

हेज। नति। अत्र यस्मिन् दलितं नाशितं मनुजानां मर्त्यानां अशेषं निखिलं कलुषं पापं।
यया। एवंविधा लक्ष्मीलालवदीया श्रीउमन नास्ति तस्मिन्। अशुभमया। अकल्याणप्रचुरामू
र्तिः स्वरूपं। यस्य। यस्मिन् जनपदे देशे अयं वक्ष्यमाणः विभागः वर्त्तत इति शेषः।

॥ विमानैः स्वच्छंदं सुरपुरमयं ते सुकृतिनः पतंति द्राक् पापा जननि नरकांतः परवशाः॥
॥ विभागोयं तस्मिन्नशुभमयमूर्तौ जिनपदे न यत्र त्वल्लीलादलितमनुजाशेषकलुषा॥
॥२२॥

अयं क इत्याकांक्षायामाह सुकृतिनः पुण्यवंतः विमानैः व्योमयानैः स्वच्छंदं यथेच्छं
सुरपुरं स्वर्गलोकं अयं ते गच्छंतीत्यर्थः पापाः इषत पालकिनः परवशाः याम्याधी
नाः संतः द्राक् दूरतः नरकांतः निरयमध्ये पतंति निपतंतीत्यर्थः। २२॥ ५॥ ५

हे अंब जननि विप्रान्‌ ब्राह्मणान्‌ घ्नंतोपि प्राणैर्वियोजयंतोपि अथ च गुरुसती: । गुरूणां पित्रा
दीनां सती: तदेकत्र तान्‌ दारान्‌ अविरलं सततं विशंत: । गच्छंतोपि अथ च मैरेयं निंद्यसुरां पि
बंत: प्राश्नंतोपि पुन: च कनकं सुवर्णं अपहरंत: चोरयंतोपि अंते प्राणवियोगसमये त्वयि

॥ अपि घ्नंतो विप्रान्‌ विरतविशंतो गुरुसती: पिबंतो मैरेयं पुनरपहरंतश्च कनकं ॥
॥ विहाय त्वय्यंते तनुमतनुदानाध्वरजुषामुपर्यंव क्रीडंत्यखिलसुरसंभावितपदा: २३ ॥

गंगायां तनुं शरीरं विहाय त्यक्त्वा अतनूनां अनल्पादायनां तुलादीनां । अध्वराणां । अश्वमेधा
दीनां जुष: सेवक: । तेषां उपरि ऊर्ध्वस्थाने अखिला: अशेषा: ये सुरा: इंद्रादयस्तै: संभावि
तपदे चरणौ येषां तथाविधा: संत: क्रीडंति विहरंतीत्यर्थ: ॥ २३ ॥ ॥ ५ ॥ ॥ ५ ॥

॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥ ॥ ५ ॥

तेलवशिवाया: कल्याण्या: मूर्ते: विग्रहस्यमहिमानंमाहात्म्यंनिगदितुं वर्णितुं इह अस्मि
ल्लोके क: समर्थ: नकोपीत्यर्थ: किंभूताया: मूर्ते: ईक्षामात्रात् अपिआवलोकनादेवापि
नृणां प्राणिनांभवभयं संसारभीतिंपरिहरंत्याविनाशयंत्या: साकात्या कांक्षामात्र अमर्ष

॥नृणामीक्षामात्रादपिपरिहरंत्याभवभयंशिवायास्तेमुर्ते: कइह महिमानंनिग ॥
॥ दितुं अमर्षम्लानाया: परममनुरोधंगिरिभुवो विहायश्रीकंठ: शिरसिनिय ॥
॥ तंधारयतियां ॥ २४॥

णमात्सयजनितरोषेणम्लानाया: म्लानाया: गिरिभुव: पार्वत्या: परमंउत्कृष्टंअनुरोधंसंकोचं
विहायत्यक्त्वाश्रीकंठ: शिव: शिरसिजटाजूटेनियतंनियमेनधारयतियांमूर्तिंआवहति ॥ २४॥

सोपिवक्ष्यमाणदुराचापिपवमानः मभंजनः त्वत्संबधिनीनां लीलाचलितलहरीणां लील
याअनयासेनचलिताः श्चंचलाः याः लहरयाः स्तासां द्राक् दूरतः व्यतिकरात् संसर्गात्
त्रिभुवनंत्रैलोक्यंपुनीतेयवित्रयतिअहुहआश्चर्यंसदुराचारइत्योकांक्षयामाह वोवायुः अल

॥अलभ्यंसौरभ्यंहरतिनियतंयः सुमनसांक्षणादेवंप्राणानपिविरलशास्त्र ॥
॥क्षतहृदां त्वदीयानां लीलाचलितलहरीणां व्यतिकरात्पुनीतेसोपिद्रागह ॥
॥हपवमानस्त्रिभुवनं ॥२५॥

भ्यंदुष्प्राप्यंसुमनसांसुहृदांकुसुमानांसौरभ्यंसुरभिगंधं नियतंनियमेनहरतिअथचविरह
प्रियवियोगएवशास्त्रंआयुधंतेनक्षतंविदीर्णंहृत् अंतः करणंयासां तासांअबलानां प्राणा
न् विजीवितानपिक्षणादेवक्षणमात्रेणैवहरतिगृणोति॥२५॥ ॥५॥ ॥५॥ ॥५॥
॥५॥ ॥५॥ ॥५॥ ॥५॥

४

हे मातः जननि प्रभाते प्रातःकाले स्नांतीनां स्नानं कुर्वतीनां नृपतिरमणीनां राजदाराणां कुट
तटीगतः उरोजप्रांतसंलग्नः मृगमदः कस्तूर्याख्यः तवते तोये जले यावत् यक्षणे मिलति
संगतो भवति तावत् तक्षणे एव मृगाः गंधहरिणाः वैमानिकानां व्योमयानस्थानां शतसह

॥ प्रभाते स्नातीनां नृपतिरमणीनां कुचतटगतो यावन्मातर्मिलति तव तोये मृग
मदः ॥ मृगास्तावद्वैमानिकशतसहस्रैः परिवृता विशंति स्वच्छंदं विमलवपुषो
॥ नंदनवनं ॥ २६ ॥

स्रैः असंख्यातैः परिवृताः परिचयं थिं वेष्टिताः संतः स्वच्छंदं यथेच्छं नंदनवनं इंद्रकाननं
विशंति प्रविशंति ॥ २६ ॥ ॥ ॥ श्रीगंगाजिसाहे ॥ ॥ ॥ ॥ ॥ ॥

॥१७॥ कामानां वांछिताणां सवित्री प्रदात्री भवती त्वं जगति लोके यदि यर्हि जागर्ति विनिद्रासि त
र्हि अहो मातः विधिः लोककर्ता ब्रह्मदेवः निःशंकं सृष्टिचिंतारहितं यथा तथा निरवधिगत
कालमर्यादं यथा तथा च समाधिं चित्तवृत्तिनिरोधं विधत्तां समाश्रयतु अथ च हरिः जगत्पा

॥ विधात्तां निःशंकं निरवधिसमाधिं विधिरहो सुखं शेषे शेतां हरिरविरतं नृत्यतु हरः ॥ शेनांश्यां
॥ कृतं प्रायश्चित्तैरलमथ तपोदानयजनैः सवित्री कामानां यदि जगति जागर्ति भवती ॥ २७ ॥
सदैवं

लको विष्णुः शेषे अनंते सुखं सुखेन शेतां स्वपितु अथ च हरः संहर्ता शिवः अविरतं आ
विश्रांतं नृत्यतु अथ च कृतं प्रायश्चित्तैः निष्पादितपापापहोपायैः अथ च तपोदानयजनैः
अलं तैन किंचित्साध्यं इत्यर्थः ॥ २७ ॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥

ततउक्तविभवं यस्त्वं प्रसिद्धं श्रवणयोः श्रोत्रयोः रमणीयं सुखकरं गंगेतिपदं द्व्यक्षरः शब्दः
प्राणप्रांते प्राणोत्क्रमणसमये ममवदनकमलस्य मुखपद्मस्य प्रांतर्मध्ये विलसतु विराजतां
कीदृशं पदं यत् पदं स्मृतं तत् स्मृति गोचरं सत् सद्यः तत्कालं नितांतं अत्यंतं स्वांतं प्रांतः

॥ स्मृतं सद्यः स्वांतं सुखयति नितांतं सदपि प्रगीतं यत्पापं सपदि निभवतां ॥
॥ पंचहरति इदं तद्गंगेति श्रवणरमणीयं खलुपदं मम प्राणप्रांते वदनकमलांत ॥
॥ विलसतु ॥ २८ ॥

करणं सुखयति हर्षयतीत्यर्थः अथच सद्देकैदेवप्रगीतं उच्चारितं सत् पापं पालकं भव
स्य संसारस्य तापं दाहं च सपदि सद्यः हरति नाशयति ॥ २८ ॥ ५ ॥ ५

हे जननि ते तव लहरय ऊर्मय विजयंतां सर्वोत्कर्षेण वर्त्ततां किंभूता पुरारेः शिव
स्य कपर्द्दान् जटाजुटात् उल्लस्य प्रकाश्यमृदुलतरा अतिकोमला या सीमंतसरणिर्यत्तु कबी
थिस्तथ्यां प्रेखंत्य खेलंत्य किंभूतस्य पुरारेः प्रणयेन अनुनयेन मिलत् अर्धांगं युव

॥ कपर्द्दादुल्लस्य प्रणयमिलदर्द्धांगयुवतेः पुरारेः प्रेखंत्यो मृदुलतरसीमंतसरणौ ॥

॥ भवान्या सापत्न्यस्फुरितनयनं कोमलरुचा करेण क्षिप्तास्ते जननि विजयंतां लहरयः ॥ ते

॥२१॥

तिर्यस्य किंभूता लहलहरयः भवान्या रुद्राण्या कोमलरुचा मृदुलकांतिना करेण पाणि
ना सापत्न्यस्फुरितनयनं सपत्न्यं मत्सरेण स्फुरिते चंचले नयने नेत्रे यत्र यथा तथा आक्षिप्ताः

अयंपुरोवस्थितः॥ अहंमल्लक्षणोजनः त्वांप्रतिसंप्राप्तः उचितंसंगतः इहअस्मिन्वि
षयेत्वमपिसमुचितंसुयुक्तंविदध्याः विधेहिस्वौचित्यमेवाहस्नेहेनहृदयया आर्द्रां आर्द्रां प्रापुतां
प्रतिअनाथः निस्वामीकः अथचपुण्यासुकृतसाध्यायागतिः स्तांददातितांविगलिताभ्र
ष्टागतिः उत्तमलोकप्राप्तिः यस्मात्तसः पुनः विश्वस्यचराचरस्यउद्धर्त्रींतुन्मज्जयित्रीं

अनाथःस्निग्धार्द्रोविगलितगतिःपुण्यगतिदांपतन्विश्वोद्धर्त्रींगदविदलितः ॥ गं
सिद्धभिषजं सुधासिंधुंतृष्णाकुलितहृदयोमातरमयं शिशुःसंप्राप्तस्त्वा ॥
॥ महमिहविदध्याःसमुचितं ॥ ३०॥

पतन्अधोगच्छन्पुनः सिद्धः दिव्यः भिषक् चिकित्सकः स्तंगदेनन्निंधरोगेणविदलितः
चूर्णीकृतः सन्सुधायाः अमृतस्यसिंधुंसमुद्रंतृष्णयादुरवगाहेच्छयाआकुलितंविकली
कृतंहृदयंअंतः करणंयस्यसः पुनः मातरंजननींविभुः स्तनंधयोर्भकः सन् संप्राप्तोयमि
तिसर्वत्रान्वेति ॥ ३०॥

हे अंब मातः। भवत्या जगत्पूज्यया त्वया हि यतो हेतोः। व्रात्याः पतितसावित्रीकाः। अध
माः दुःशीलाः। पतिताः। ब्रह्मघ्नादयः। पाखंडाः। वेदविनिंदाचाररताः। तेषां परिषदः।
समाजाः। तत्परित्राणे स्नेहः। रुचिः। यथा येन प्रकारेण श्लथयितुं शिथिलयितुं अशक्यः
दुर्घटः। खलु निश्चयेन एवं अनेन नैव प्रकारेण मयापि मल्लक्षणजनेनापि दुरितानां पातका
व॥ भवत्या हि व्रात्याधमपतितपाखंडपरिषत्परित्राणस्नेहः श्लथयितुमशक्यः खलु॥
॥ यथा मयाप्येवं प्रेमा दुरितनिवहेष्वं वजगति स्वभावोयं सर्वैरपि खलु यतो दुःपरिहरः॥

॥३१॥

नां निवहाः। समाजास्तेषु प्रेमा प्रीतिः। तथा श्लथयितुं अशक्यः। यतो हेतोः। जगति लोके
अयं दुर्धर्षः स्वभावः निसर्गः। सर्वैरपि अखिलैरपि दुःपरिहरः दुर्निवारः। अत एव खलु
निश्चयेन मम त्वत्सजातीयाचारस्वभावस्य दुष्परिहरत्वमेव प्रयोजकं ममैव न कश्चिद्दोष इ
त्यर्थः॥३१॥

हे मातः। जननि अत्रभवतीं पूज्यां भवतीं त्वां प्रति कति किंसंख्याकाः न प्रपद्यंते शरणमायांति अपितु सर्वेष्यायांतीत्यर्थः। परंतु अत्र लोकागमने उपाधिः कृत्रिमहेतुः यत्नूयत्नः अभीष्टं वांछितं वितरसि ददासि अत्र तः स्फुरति स्यस्टं प्रकाशते अनुदिन निर्मले तु पुनः।

प्रपद्यंते लोकाः कति न भवतीमत्रभवतीं परं त्वत्रोपाधिः स्फुरति यदभिष्टं वितरसि॥ शपे तुभ्यं मातर्मम तु पुनरात्मायमनघे निसर्गादेव त्वय्यमितमनुरागं विधृतवान्॥ ३२॥ श्रीगंगासोह

पूर्वत्ययेमममे अयं अहंकारस्पदः आत्मा जीवः निसर्गात् स्वभावादेव त्वयि तद्विषये अमितं अपरिछेद्यं अनुरागं प्रेमाणं विधृतवान् संबंधितवान् इति तुभ्यं त्वत्प्रत्ययार्थं त्वामेव शपे शपथ

टीकायाः ५३ ॥

हे मातः त्वत्ते पयः पानीयपु प्राशुसपदि तत्क्षणे एव विमूढैः अतिमूर्खैः सहचरैः
सरंतु विक्रीडितुं यातः मनः सन् क्वचिदपि कुत्रापि देशे काले च विश्रांतिं विश्रमं न नहि अग
मं अ वाप्तवानस्मि हे सदयं सानुकंपं हृदयं अंतःकरणं यस्यास्तत्संबुद्धौ इदानीं अतिश्रमसमये

॥ पयः पीत्वा मातस्तव सपदि यातः सहचरैर्विमूढैः संरंतुं क्वचि ॥
॥ दपि न विश्रांतिमगमं इदानीमुत्संगे मृदुपवनसंचारशिशिरे चि ॥
॥ रादुन्निद्रं मां सदयहृदये शायय चिरं ॥ २२ ॥ श्रीगंगाजुसोहे ॥

मृदुपवनः मंजुलवायुः तस्य संचारस्तेन शिशिरः तस्मिन् उत्संगे अंके चिरात् बहुकालं
उन्निद्रं उज्जतं त्वायं मां मल्लक्षणं शिशुं चिरं शाययस्वापय ॥ २२ ॥ ॥ ५ ॥ ॥ ६ ॥

हेअंब मातः त्वं सदैव सर्वदैव त्वय्येव भवत्या मेव अर्पितः निहितः कुशलस्य सुखस्य चिंता

याः कथं भावेच्छायाः भरः भारः येन तं रमं अतिहीनं अस्मिन् सुविषमे अतिप्रतिकूले समये

अवसरे यथि यर्हि त्यजसि उत्ससि तदा तर्हि अयं सत्संग्राह्यः विश्वासः अप्रतारकत्वज्ञानरूपः

> सदैव त्वय्येवार्पितकुशलचिंताभरमिमं यदि त्वं मामंब त्यजसि समयेऽस्मिन्सुविषमे ॥
> तदा विश्वासोयं त्रिभुवनतलादस्तमयते निराधारा चेयं भवति खलु निर्व्याजकरुणा ॥ ३४ ॥

त्रिभुवनतलात् त्रैलोक्यात् अस्तं नाशं अयते प्राप्नोति च पुनः इयं शिवा शिता निर्व्याजा अकृत्रि

मा करुणा परदुःखप्रहाणेच्छा निराधारा लुप्ताश्रया भवति भविष्यति खलु निश्चयेन ॥ ३४ ॥

हे अंबमाल : नवले आलंबात् । आलंबनात् । स्फुरन् उल्लसन् । अलघु : । गरीयान् गर्वो यस्य तेन
मयासहसा अविचारेणैव सर्वेऽखिला : । सुरगणा : । देवसमूहा : । अवज्ञाया : । अवमाननाया :
सरणिं वीथिं नीता : । प्रपिता : । हे भागीरथी अथ अनंतरं इदानीं । अस्मिन् समये यदि यर्हि भो

तवालंबाद्दंबस्फुरदलघुगर्वेण सहसा मया सर्वेऽवज्ञासरणिमथ नीता : सुरगणा : ॥
इदानीमौदास्यं यदि भजसि भागीरथि तदा निराधारो हा रोदिमि कथय केषामिह पुर : ॥

।२५।

दास्यं उपेक्षां भजसि दृधारयसि । न दाता तर्हि निराधार : गताश्रय : । अहं इह लोके केषां लोका
नां पुर : । अग्रह : रोदिमि रोदनं करोमि लन् । कथय निरूपय हा कष्टं ॥ २५ ॥ ॥ ६५ ॥

हेजननिरदंद्दगोचरंतवतेसलिलं आतृप्तिपिपासोपशमपर्यंतं पिबंतां प्राश्नतांजनानांआनं
दः आल्हादः निर्वाणपदवी मोक्षभूमिंपरिहासतिपरिहासंकरोति किंभूतं सलिलंसुधातः

॥ आपिप्राज्यंराज्यंतृणमिवपरित्यज्यसहसाविलोलद्धानीरंतवज
ननितीरंश्रितवतां॥ सुधातःस्वादीयःसलिलमिदमातृप्तिपिब
तांजनानामानंदः परिहसतिनिर्वाणपदवीं ॥३६॥श्रीगंगा ॥

अमृतादपिस्वादीयः अतिरुचिरं किंभूतानांजनानां प्राज्यंभूयिष्टमपिराज्यंसाम्राज्यंतृणमि
वशुष्कशष्पैकदेशवत् सहसाअविधार्यैवपरित्यज्यउज्झित्वाविलोलंतःकंपंतः वानीराःन
मालाः यत्रयथाविधंतवतीरंतटंश्रितवतांआश्रयतां॥३६॥ ॥५॥ ॥५॥ ॥५॥

त्रिदशानांदेवानांतटिनीनदीतस्याः। तांडवंनृत्यंतस्यविधिः। विधानंनोस्माकंतापंआध्यात्मि
कादिदुःखत्रयंतिरोधत्तांविनाशयावित्यर्थः। किंभूतः। त्रिविधः। प्रदोषांतेसंध्यामध्येनृत्यन्
तांडवंकुर्वन्। यः पुरमथनमहाशिवः। तस्यलीलया। अनायासेनउद्धृताः उच्चलिताः। याः ज
टाः संवलितकेशाः। तासांतटाः प्रान्ताः। तेषुआभोगः। मध्यविस्तीर्णदिशा। तत्रप्रेंखंत्यः

॥ प्रदोषांतेनृत्यत्पुरमथनलीलोद्धृतजटातटाभोगप्रेंखल्लहरि ॥

बिलं ॥ भुजसंतानविधुतिः। लटकोडक्रीडज्जलडंजनिलतारावलिशा ॥ डमरुडंकारसु भग्नं

पा॥ तंस्तिरोधत्तांतापंत्रिदशतटिनीतांडवविधिः॥ ॥२७॥ ॥

याः लहरयः ऊर्मयः तद्रूपाः येभुजाः तेषांसंतानंकुलंतस्यविधुतिः विधुनंत्रयतादृशाः
पुनः किं० तटानांतीराणां क्रोडमध्यः तत्रक्रीडद्धिलहरघज्जलंनीरंतेनजनितंतारावली
नां मुक्तामालानांशतंयत्रतथाविध्धः॥२७॥ ॥५७॥ ॥५७॥ ॥५७॥

हेमातः जानन्निलेत्त्वविियोगः असान्निध्यंयत् यतः अयं अनुभूतः मेमैवमंतुः अपराधः
अंतोहेतोः इहयेतस्मिन् क्षणमपिं किंचित् कालमात्रं करुणा कृपा कार्या कीदृशास्यममनियतं
शीघ्रंगच्छतां महीपानां राज्ञां पुरोग्रेधावंधावंधावित्वा धावित्वा नानाविधा आंतराः मानसाः
तरुणाः दुर्धर्षाः खेदाः यस्यतथाविधस्यपुनः किंभूतस्य ममस्वहितानां निजपरिणाम

पुरोधावंधावंद्रविणमदिराघूर्णितदृशां महीपानांनानांतरैस्तैरुणैखेदस्यनियतं ।
तु मेमैवायंमंतुः स्वहितशततहेर्जउधियो वियोगस्तेमातर्यदिहकरुणातः क्षणमपि

२८

सुखानांछांतंमारुतः तस्यहंता नाशकः तस्यपुनः किंमम अतएवजउधियः मूर्खस्य
स्यकिंभूतानांमहीपानांद्रविणंसंपत्तद्रूपया मदिरया मद्येनाघूर्णितां व्यामोहितादृक् दृष्टिर्ये

चा॰टी॰ ॥३८॥

साउक्तिविभवास्यंवृगोचरातेतनवमूर्तिः स्वरूपंममभेस्मितंअंतः मध्येत्रिविधंअध्यात्मि
काधिदैविकाधिभौतिकभेदेनत्रिप्रकारंसंतापंदुःखंअथच तथाविधंपापंपातकंमपिहर
तां। नाशयतुसाकेत्याः किंरूपामूर्तिः श्रसृतंअनाचरितंसुकृतंपुण्यंयैः तथाविधानामपि

स्मृतियाता पुंसामकृतसुकृतानामपिचयाहरत्यंतस्तंद्रां
ॐ तिमिरमिवचंद्रांशुसरणिः इयंसातिमूर्तिः सकलसुरसंसे
व्यसलिलममांतःसंतापंत्रिविधमथपापंचहरतां॥ ३९

पुंसांलोकानांस्मृतिस्मरणविषयतांयाताप्राप्तासाअंतः आभ्यंतरांतंद्रांजाड्यंहरतिना
शयतिकाकिमिवचंद्रस्यइंदाः अंशूनांकिरणानांसरणिवीथिः तिमिरंअंधकारमिवकिंभूता
मूर्तिः अखिलसुराः निखिलदेवाः तैः संसेव्यं सत्याराध्यंसलिलंउदकंयस्याः सा। ३९

हे मातः। सा तुल विधात्वदीया त्वत्संबंधिनीं मृत्सां मृत्तिकां मं ममेदं। निःशेषामपिशुचं
२ दुःखं हर्तुं नाशयतु ब्धा कागा मृत्स्ना लोकैः जनैः ललाटभाले सलीलं सखेलं तिलकिता
अंकितासतिलमः। अशुभलक्षणं अंधकारं हर्तुं निराकर्तुं तरुणतरः निदाघमाध्यंदिनः।

ति॑ं ललाटे या लोकैरिह खलु सलीलं तिलकिता तमो हर्तुं धत्ते तरु-
णतरमार्तंडतुलनां॥ विलुंपंती सद्यो विधिलिखितदुर्वर्णसरणिं
त्वदीया सा मृत्स्ना मम हरतु मृत्स्नामपिशुचं॥४०॥ श्रीगंगा

यो मार्तंडः सूर्यस्तस्य रिव तुलनां साम्यं धत्ते धारयति किंभूतां मृत्स्नां सद्यः धारणसमय एव वि-
धिना ब्रह्मणा लिखिताया दुर्षणानां दुःखदाक्षराणां सरणिः पंक्तिः तां विलुंपंती तिरोदधती
॥४०॥

त्रिदशानां देवानां नदि नी सरित् तस्याः तीरं तटं तत्संबंधिनः तरवः वृक्षाः नः अस्मा
कं सखायः मित्राणि संतु भवंतु किंभूताः तरवः मुकाः अतएव नरान् मनुष्यान् विकचा
नां विकसितानां कुसुमानां ये व्रातास्तेषां मिषतः छलात् सोल्लासं सानंदं हसंत उपहासं कुर्व
तः पुनः किंभूताः नित्यं अहत्रं मलिनाः मालिन्ययुक्ताः अपि च नः भ्रमरान् सततं

टीं नरान्मूकांस्तत्त्वजनपद्हस मासक्तमनसोहसंतः सोल्लासं

विकचकुसुमव्रातव्यमिषतः ॥ पुनानासौरभ्यैः सततमलिनो

नित्यमलिनान्सखायोनः संतु त्रिदशतटिनीतीरतरवः ॥४१॥

अनारतं सौरभ्यैः सुगंधैः पुनानाः पवित्रयंतः ॥४१॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥

ततुउक्तविभवं एतत् वृश्यमानं तेतवतीरं तटं नोस्मावं श्रमशामनेदुःखनाशनेधीरं समर्थं भव
तुअस्तुतत् किमित्याकांक्षायामाहयदंत ः। यस्यतीरस्यअंत ः। मध्येखेलंत ः। क्रीडंत ः। काकाः
ध्वांक्षाः। बहलतर ः। अतिप्रभूत ः। संतोष ः। आनंद ः। तेनभरिता ः। पूरिता ः। संत ः। नाकाधी

येदंत ः खेलंतोबहुलतरसंतोषभरितानकाकानाकाधिश्वरनगरसा
कांक्षमनस ः॥ निवासाल्लोकानांजनिमरणशोकापहरणंतदेतत्तेती
रंश्रमशामनधीरंभवतुन ः॥४२॥ ॥श्रीगंगामाईजुसाहेय॥७॥

श्वर ः। स्वर्गाधिप ः। तस्यनगरेअलकावत्यांसाकांक्षंसस्पृहंमनोंत ःकरणंयेषांतथाभूता ः। ननभवं
तिपुन ः। किं निवासात् वसंते ः। लोकानांजनानांजनिर्जन्ममरणंमृत्यु ःताभ्यांय ःशोक ःदु ःखंतस्या

पुष्करपंचाशिका ॥४२॥

ततनु उक्तप्रकारं विष्णोः श्रीशस्य पदं वैकुंठाख्यं अखिलाः सर्वेजीवाः तेषां साधारणतया साम्ये
नदर्शनाघ्ययच्छंती खंभवती इह जगति केनजेनन तुलनीया उपमेया असि भवसि इति नः अ
स्मान् कथय निरूपय किंतत् महादानैः तुलादिभिः ध्यानैः स्वरूपचिंतनैः बहुविधानाना

॥ महादानैर्ध्यानैर्बहुविधवितानैरपि चयन्नलभ्यं घोराभिस्सुविम ॥
॥ लतपोराजिभिरपि ॥ अचिंत्यं तद्विष्णोः परमखिलसाधारण ॥
॥ तयादद्दानाकेनासित्वमिहतुलनीयाकथयनः ॥४३॥ ॥ ७॥ ॥

प्रकाराः ये वितानाः यागाः तैरपि नलभ्यं अप्राप्यं अथच घोराभिः अतितीव्राभिः तप
सां निरोधानां राजिभिः मालाभिरपि नलभ्यं अथच अचिंत्यं अतर्क्यं ॥४३॥ ॥७॥ ॥८॥

हेसुरसरिति देवनदि यत् उक्तं विधं तत्वं यथार्थवस्तुतत्व । वस्तुत्वं भवतीन विषयः । अगोचरः असि किं विधं यत् गलिते भेदे । अद्वैतपरे । वेदे । श्रुतिशिरपि साक्षात् विधिमुखेन ननिग दितं अप्रतिपादितं अथ च यस्मिन् यद्वस्तु निजीवानां औपाधिक चैतन्यानां मनोवागवस

॥ नयत्साक्षाद्वेदैरपि गलितभेदैर्निगदितं नयस्मिन् जीवानां ॥
॥ प्रभवति मनोवागवसरः ॥ निराकारं नित्यं निज महिम निर्वा ॥
॥ सितलमो विशुद्धं यत्तत्वं सुरतटिनि नित्यं नविषयः ॥ ४४ ॥ ॥

रः । वाङ्मनसयाः संचारः । नभवति अथ च निराकारं अव्यक्तं नित्यं कालत्रयाबाध्यं निजमहिम्ना स्वमाहात्म्येन ननिर्वासितं प्रध्वस्तं तमो अज्ञानध्वांतं येन तत् विशुद्धं स्वप्रकाशं ॥ ॥ ४४

हेत्रिपथगेस्वर्गंगि। एके उपत्यकाः। कठिनतरा अतिदुर्धरासेवायेषां तथाविधान् दिवान् उपास्या
नूजपंति अथ च तदपरे कर्मठाः वितानेषु यागेषु सुनिरताः कतिपय ज्ञानिनः। अहं अयमनि
यमेषु अंतर्बाह्यनिग्रहादिषु रक्ताः तत्पराः संतीत्यध्याहारः। हे जननि। अहं जगन्नाथः।

॥ जंपत्येके देवान् कठिनतरसेवांस्तदपरे वितानव्यासक्ता यम ॥
॥ नियमरक्ताः कतिपये। अहं तु त्वन्नामग्रहणभृतकाम त्रिप ॥
॥ थगे जगज्जालं जाने जननि तृणजालेन सदृशं ॥ ४५ ॥ ॥

तु पुनः त्वन्नाम्नः गंगेति शब्दस्य ग्रहणेन आलंबनेन भृतः पूर्णः। कामो मनोरथः। य
स्य तथाविधः सन् जगज्जालं प्रपंचवागुरां तृणजालेन निःसारोल्पसमूहेन सदृशं जाने

हेजननिस्रतां साधूनां श्रेयः अभीष्टं कर्तुं संपदयितुं स्तलिनः कुशलाः विबुधाः देवाः कति
किं संख्याकाः नसंतिन तिष्ठंति किंभूतानां सतां अविश्रांतं अविरामं जन्मावधिजननमारभ्य सु
स्तकर्माणि पुण्यक्रियाः तन्यंन्वतिशयेनार्जयंति ते तथा तानू लुपुनः निरस्तः विगलितः

श्रविश्रांतंजन्मावधिसुस्तकर्मार्जनवतांसतांश्रेयः कर्तुंकतिन
स्तिनः संति विबुधाः निरस्तालंबानामस्तुसुस्तानांतुभव
तींविनामुष्मिन्लोके नपरमपिलोकेहितकरं ॥ ४५ ॥ श्रीगंगा

आलंबोवलंबनंयेषांतेषां अथच अस्तलानि असंपादितानि सुस्तलानि पुण्यानियेस्तेषां अमु
ष्मिन् अस्मिन्नपिलोके भुवनेहितकरं इष्टकर्तारं भवतीत्वां विना विहाय परं अन्यं नलोके न

श्रीगंगा॥
॥२७॥

हेसुरधुनीअयंप्रसक्तः।जगन्नाथस्यपातकिष्वितिप्रसिध्धस्यनाम्नः।समुध्धारस्यपात
काब्धेर्निष्कासनस्यसमयः।अवसरः।अतोहेतोः।त्वंइतरेयेआनाःपातकिनः।तत्सा
धारणात्साम्यविषयायाधीःबुध्धिः।तयाहेलांअवज्ञांनकुर्याः।माकुरुअतः।किंकार्यं

बधानद्रागेवद्रढिमरमणीयंपरिकरंकिरीटेबालेंदुंनियम
यपुनःपन्नगगणेः नकुर्यास्त्वंहेलामितरजनसाधारण २ ॥ र
याजगन्नाथस्यायंसुरधुनिसमुद्धारसमयः ४७ ७

तदाहृढिम्नादाढ्येनरमणीयंसुंदरंपरिकरंकटिबंधनवस्त्रंद्रागेवदूरताएवबधा
नसंघटयपुनःकिरीटेमुकुटेबालेंदुंशिशुचंद्रंपनगानासर्पाणांगणेसमूहेःनियमय

लहरी॥
॥२७॥

हे
जननि त्वां ये जनाः ध्यायंति चिंतयंति तेषां लोकानां परिभवः पराजयः न उदयति उ
ज्ञयति किंभूतां त्वां शरच्चंद्रः शारदशार्वरीशः तद्वत् श्वेतां पुनः किं० शशिनः चंद्रस्य शक
लेन कलया शोभानः रोचमानः मुकुटो यस्यास्तां करैः हस्तैः वामाभ्यां दक्षाभ्यां कुंभांभोजे

शरच्चंद्रश्वेतां शशिशकलशोभालमुकुटां करैः कुंभांभोजे
सो वरभयनिरासं च दधतीं सुधासाराकाराभरणवसनां शुभ्र मकरं
कमलस्थितां त्वां ये ध्यायंसुदयति न तेषां परिभवः ॥ ४८ ॥

अमृतकलशपद्मभावासहितं भयनिरासं अभयमुद्रां दधतीं बिभ्रतीं पुनः सुधासारा पीयूष
निपृष्टछटाः तदाकाराणी आभरणानिव त्वां पुनः शुभ्र कमले श्वेतपद्मे स्थितां ॥ ४८

हे स्वर्लोककल्लोलिनि स्वर्गगंगे मंत्रैः। तापशामकैः मुनिभिः। मीलितं अंतर्हितं पु०। तादृशैः
औषधैः। ओषधीभिः। मुकुलितं शुष्कतां गतं पु०। सुराणां देवानां गणेः समूहैः। त्रस्तं सं
तप्तं किंच सुधारसैः। अमृतद्रवैः। स्त्रस्तं अधोविकीर्णं पु०। मारुत्मतैः गरुड संबंधिभिः ग्रा

॥ मंत्रैर्मीलितमौषधैर्मुकुलितं त्रस्तं सुराणां गणैः स्त्रस्तं किंच सुधारसैर्विदलितं ॥
॥ गारुत्मतैर्ग्रावभिः॥ वीचिक्षालितकालियाहितपदे स्वर्लोककल्लोलिनी ॥
॥ त्वं तापं तिरयाधुना मम भवव्यालावलीढात्मनः ॥४१॥ श्रीगंगाजी ॥ ॥

वभिः। मणिभिः। विदलितं चूर्णीभूतं। अधुना अस्मिन्समये त्वं भवः संसारः। स एव व्या
लः। सर्पः। तेनावलीढः। स्वतः स्तः। आत्मा विग्रहो यस्य तादृशस्य मम मे तापं त्रिविधदाहं
तिरय नाशय नश्यं किल गंगे वीचिभिः। उर्मिभिः। क्षालितो धौतो कालियाहितस्य तांडवकृष्णस्य

लहरी॥
पदैः यथायाग संबंधः ॥४१॥
॥२८॥

हेआंबमात : । लवलेव्यालोला : । अतिचंचला : । उल्लासिन्य : प्रमोदयुक्ता : वल्गंत्य : क्रीडं
त्य : या : लहर्य : ऊर्मय : स्ता नवानूलयाघंटासंघास्तैस्ताउवं नाटयंनोस्मान् पूनीतां
पवित्रयत्वित्यर्थः । भूतास्तवसाकूतं साभिप्रायंहैमवत्या पार्वत्या वीक्षितायाः किंलोकि
तायाः कथंभूतयाहैमवत्यामृदुलं मंदंहासितास्मितालयाकस्मिन्सति । द्यूते अक्षक्रीडा

॥ द्यूते नागेंद्र कृत्ति प्रमथगणफणिश्रेणिनंदींदुमुख्यं सर्वस्वंहारयित्वास्वमथपुरभिदि ॥
॥ द्राक्पणीकर्तुकामे ॥ साकूतंहैमवत्यामृदुलहसितयावीक्षितायास्तवांव व्यालो ॥
सि ॥ लोल्लोलवल्गल्लहरिनवघटीतांडवंनः पुनीतां ॥ ५० ॥ ॥ ५ ॥ ५॥ ॥ ५॥

यां नागेंद्रस्य गजराजस्य कृत्तिश्चर्म प्रमथगणः पार्षदसंघः फणीनां सर्पाणांश्रेणयः पंक्त
यः नंदीआरोहवृषभः इंदुः मौलिभूषणचंद्रः एतेमुख्याः यस्मिंस्तादृशं सर्वस्वं अशेषआ
त्मीयं तारयित्वापणीकृत्य अथस्वं आत्मानं द्राक् तं पणीकर्तुं व्यवहर्तुं कामोइच्छा यस्य तथा

टिहुगौरीसति ॥ ५० ॥ श्री ॥ २

गंगा भागीरथी मम मे अंगानि शरीरावयवानी अमलीकरोतु किं० निष्पापानि संपादयतु विभूषितं अनंगरिपोः कामारेः उत्तमांगं शिरो यया पुनः सद्यः आसत्तिसमय एव कूलः अनिष्पा

॥ विभूषितानंगरिपूत्तमांगा सद्यः कृतानेकजनार्तिभंगा ॥
॥ मनोहरोत्तुंगचलत्तरंगा गंगा ममांगान्यमलीकरोतु ॥५१॥

दितः अनेकेषां अगणितानां जनानां अर्तिभंगो दुःखभंगो यया पुनः मनोहराः हृदयंगमाः उत्तुंगाः अत्युन्नताः तरंगाः यस्याः ॥५१॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

स्वनिर्मितस्तवतस्यसफलत्वंवर्णयति इमां एकपंचाशत्पद्यात्मिकां पीयूषलहरी संज्ञकां स्व
नां चलंतः उच्छलंतः जगन्नाथरयेन निर्मितां निष्पादितांयः जनः उच्चारयेत् तस्यजन

॥ इमांपीयूषलहरींजगन्नाथेननिर्मितां॥ यः पठेत्तस्य ॥
॥ सर्वत्रजायंतेजयसंपदः ॥५२॥ इतितैलंगकुलोद्भवेन ॥
॥ भट्ट श्रीजगन्नाथेननिर्मितः॥ पीयूषलहर्याख्यः श्री॥

स्य सर्वत्र निखिललोकेजयेनउत्कर्षेणसहसंपदः संपत्तयः जायंतेभवंति ॥५२॥
हे पुस्तक राजेश्रीकारिरावविनायकाचे श्रीस सन १२५७ आषाढ शु ॥ ७ समाप्तः ॥

॥ श्रीगंगालहरी समाप्तः ॥

[OrderDescription]
,CREATED=15.07.20 12:10
,TRANSFERRED=2020/07/15 at 12:17:01
,PAGES=57
,TYPE=STD
,NAME=S0003326
,Book Name=M-2610-GANGALAHARI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF

FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF

FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF

FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,